Roll No. ____________________

Total No. of Questions : 19
Total No. of Printed Pages : 8

# X-906

High School, Examination (Regular) - 2019

## संस्कृत (सामान्यम्) / SANSKRIT (GENERAL)

Time : 3 Hours ] [ Maximum Marks : 100

---

निर्देश :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1 उचित विकल्पं चित्वा लिखत – 1×5=5

(क) "परोपकारः" इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) वृद्धि सन्धिः (ब) यण सन्धिः

(स) गुण सन्धिः (द) अयादि सन्धिः

(ख) "चिदानन्दः" इत्यस्य पदस्य सन्धिविच्छेदः अस्ति –

(अ) चित् + आनन्दः (ब) चित + आनन्दः

(स) चित् + नन्दः (द) चित + नन्दः

(ग) "रामौदार्यम्" इत्यस्य सन्धिः विच्छेदः अस्ति –

(अ) रामो + ओदार्यम् (ब) रामौ + ओदार्यम्

(स) राम + ओदार्यम् (द) राम + औदार्यम्

(घ) विसर्गसन्धेः उदाहरणम् अस्ति –

(अ) सोऽस्ति (ब) सुबन्तः

(स) षण्मुखः (द) सत्यं वद

(ङ) अधोलिखितेषु अव्ययम् अस्ति –

(अ) कपि (ब) मति

(स) गति (द) अपि

2 उचित विकल्पं चित्वा लिखत – 1×5=5

(क) "अनुरूपम्" इत्यस्मिन् पदे समासः अस्ति –

(अ) कर्मधारयः (ब) अव्ययीभावः

(स) तत्पुरुषः (द) द्विगुः

(ख) द्विगुः समासस्य उदाहरणम् अस्ति –

(अ) त्रिभुवनम् (ब) सचक्रम्

(स) पितरौ (द) अनादरः

(ग) "कृष्णाश्रितः" इत्यस्मिन् पदे समास विग्रहः अस्ति –

(अ) कृष्णस्य आश्रितः (ब) कृष्ण आश्रितः

(स) कृष्णेन आश्रितः (द) कृष्णम् आश्रितः

(घ) "प्राचार्यः" इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) प्रा (ब) प्रति

(स) प्र (द) प्राच्

(ङ) अधोलिखितेषु उपसर्गः नास्ति –

(अ) असि (ब) अपि

(स) अति (द) अधि

3 उचित विकल्पं चित्वा लिखत – 1×5=5

(क) "अयाचत्" इत्यस्मिन् पदे धातुः अस्ति –

(अ) अय् (ब) याच्

(स) अच् (द) चि

(ख) "द्रक्ष्यामः" इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट् लकारः (ब) लोट् लकारः

(स) लृट् लकारः (द) विधिलिङ्ग लकारः

(ग) "भव" इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्य वचनम्

(घ) "लभे" इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) मध्यम पुरुषः (ब) उत्तम पुरुषः

(स) प्रथम पुरुषः (द) महापुरुषः

(ङ) "सदाचारः एव परमो धर्मः" अस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) सदाचारः (ब) एवं

(स) परमो (द) धर्मः

4 उचित विकल्पं चित्वा लिखत – 1×5=5

(क) "गुणवान्" अस्मिन् पदे प्रत्ययः अस्ति –

(अ) शानच् (ब) क्तवतु

(स) मतुप् (द) शतृ

(ख) "ल्यप्" प्रत्यस्य उदाहरणम् अस्ति –

(अ) आदाय (ब) वर्धमानः

(स) सर्वत्र (द) गुरुत्वम्

(ग) "कर्तुम्" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) क्तिन् (ब) तुमुन्

(स) अनीयर् (द) क्त्वा

(घ) "अनीयर्" प्रत्यस्य उदाहरणम् अस्ति –

(अ) कम्पमानः (ब) कृतवान्

(स) पठितव्यम् (द) दर्शनीयम्

(ङ) परोपदेशवेलायां ............... सर्वे भवन्ति वै ।

(अ) शिष्टाः (ब) अशिष्टाः

(स) प्रकृष्टाः (द) भृष्टाः

5 प्रदत्तैः शब्दैः रिक्त–स्थानपूर्तिं कुरुत – 1×5=5

(माता, साधकं, श्रेष्ठः, धरणी, मनः)

(क) ज्येष्ठः .......................... कुले लोके ।

(ख) तन्मे ....................... शिवसङ्कल्पमस्तु ।

(ग) भारतीयैकता ....................... संस्कृतम् ।

(घ) नवैर्जलौघैः ...................... वितृप्ता ।

(ङ) ...................... किल मनुष्याणां देवतानां च दैवतम्

6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत – 3×2=6

(क) दयानन्दः केषां प्रचारमकरोत् ?

(ख) महाभारतं कस्याः परिचायकः ग्रन्थः ?

(ग) सुतापेक्षी कः आसीत् ?

(घ) विदिशामध्ये किं नाम स्मारको वर्तते ?

(ङ) सर्वप्राचीना भाषा का अस्ति ?

7 अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत – 2

(क) राम – पञ्चमी विभक्तिः

(ख) किम् – (पुल्लिङ्गः) – द्वितीया विभक्तिः

(ग) साधु – प्रथमा विभक्तिः

8 ''तस्यै'' अथवा ''कविभिः'' इति पदस्य विभक्तिं वचनं च लिखत । 2

9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) ''बुन्देलकेसरी'' इति विख्यातस्य छत्रसालस्य जन्म (1649) एकोनपञ्चाशदुत्तरषोडशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूरपर्वतीयक्षेत्रे (मोर पहाड़ी) लिधौराग्रामसमीपे अभवत् । छत्रसालस्य मातुर्नाम लालकुँवर (सारन्धा देवी) पितुर्नाम च श्रीचम्पतरायः इत्यासीत् । अयं वीरः बाल्यकालादेव भारतमातरं मुगल शासनात् विमोक्तुं प्रयतते स्म ।

(i) 'बुन्देलकेसरी' इति कः विख्यातः अस्ति ?

(ii) छत्रसालस्य जन्म कदा अभवत्

(iii) मध्यप्रदेशस्य कस्मिन् जनपदे–ग्रामे च छत्रसालस्य जन्म अभवत् ?

(iv) छत्रसालस्य मातुः पितुः च नाम लिखत ।

(v) ''इत्यासीत्'' इति पदे का सन्धिः अस्ति ?

(ख) वरुणदेवः वृष्टिं वर्षति । सूर्यदेवः प्रकाशं प्रयच्छति । भूमाता वृक्षस्य आधारभूता अस्ति । वायुः अनिलं ददाति । ते सर्वे पालयन्ति पोषयन्ति रक्षन्ति च । ते न कदापि ''मम अधिकारः वर्तते'' इति अवदन् । ते सर्वे परोपकारिणः । अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ ?

(i) कः वृष्टिं वर्षति ?

(ii) वृक्षस्य आधारभूता का अस्ति ?

(iii) सूर्यदेवः किं प्रयच्छति ?

(iv) के परोपकारिणः ?

(v) 'वर्तते' का धातुः अस्ति ?

(ग) ''सरलसंस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत्'' । अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते सा ''संस्कृतमेव राष्ट्रभाषाभवितुम् अर्हति'' इत्युक्तवती । अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः महनीयतां च स्वीकृतवन्तः । यथा – भारतस्य प्रथमः राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः कथितवान् यत् ''संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनम् अस्ति'' ।

(i) सरलसंस्कृतमेव भारतराष्ट्रस्य किं भवेत् ?

(ii) भारतस्य प्रथमराष्ट्रपतिः कः आसीत् ?

(iii) प्रसिद्धःनायकाः कस्य प्रशंसां कृतवन्तः ?

(iv) संस्कृत साहित्यं मानवजातेः कृते किं अस्ति ?

(v) 'कथितवान्' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक् कुरुत ।

10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।
मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत् ॥

(i) कार्यं कया चिन्तितम् ?

(ii) वाचा किं न प्रकाशयेत्

(iii) गूढं केन रक्षयेत्

(iv) कार्ये किं नियोजयेत्

(v) 'रक्षयेत्' इति पदस्य धातुं लकारं च लिखत ।

(ख) दानेन भूतानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानै –
र्दानं हि सर्वव्यसनानि हन्ति ॥

(i) भूतानि केन वशीभवन्ति ?

(ii) दानेन कानि नाशम् यान्ति ?

(iii) दानैः कः बन्धुत्वमुपैति ?

(iv) दानं कानि हन्ति ?

(v) 'परोऽपि' इति पदस्य सन्धिविच्छेदं कृत्वा नाम लिखत ।

(ग) मत्ता गजेन्द्रा मुदिता गवेन्द्रा,
वनेषु विक्रान्ततरा मृगेन्द्राः ।
रम्या नगेन्द्रा निभृता नरेन्द्राः
प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥

(i) मत्ताः के ?
(ii) गवेन्द्राः कीदृशाः भवन्ति ?
(iii) के वनेषु विक्रान्ततराः ?
(iv) के निभृताः सन्ति ?
(v) सुरेन्द्रः कैः सह प्रक्रीडितः ?

11 युग्ममेलनं कुरुत – 1×4=4

| (क) | (ख) |
|---|---|
| (i) वाग्भूषणम् | (क) एकं ज्योतिः |
| (ii) मनः ज्योतिषाम् | (ख) शरीरम् |
| (iii) जर्जरम् | (ग) पृथ्वीम् |
| (iv) नानृतम् | (घ) भूषणम् |
| | (ङ) ब्रूयात् |

12 शुद्ध वाक्यानां समक्षं "आम्" अशुद्ध वाक्यानां समक्षं "न" इति लिखत – 1×4=4

(क) कुबेरः रघुं धनं दत्तवान् ।
(ख) महर्षेः ख्यातिः सर्वत्र व्याप्ता नास्ति ।
(ग) कात्यायनी सीतायै ज्ञानं दत्तवती ।
(घ) रामदेवः प्रातः स्मरणीयम् आसीत् ।

13 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत – 1×4=4

(i) सर्वोत्तमं भूषणं किम् अस्ति ?
(ii) वासुदेवः कस्य प्रियशिष्यः आसीत् ?
(iii) वैयाकरणेषु पूर्णः सर्वमान्यश्च कः ?
(iv) रथकारस्य नाम किम् आसीत् ?
(v) रामदेवः कस्मिन् ग्रामे वसति स्म ?
(vi) महर्षिः दयानन्दः कस्य स्थापनां कृतवान् ?

14 प्रश्न पत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत । 4

15 स्व प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत । 4

**अथवा**

स्वभ्रातुः जन्मदिवसोत्सवस्य अवसरे स्वमित्राय आमन्त्रणपत्रं संस्कृते लिखत ।

16 अधोलिखितेषु 'पञ्च' अशुद्धकारक वाक्यानां शुद्धिः करणीया – 5

(i) भवान् कुत्र गच्छसि ?

(ii) श्री रामं नमः ।

(iii) सैनिकः अश्वेन पतति ।

(iv) गङ्गा हिमालयेन प्रभवति ।

(v) शिक्षकः छत्रं पुस्तकं ददाति ।

(vi) वृक्षात् पत्रं पतन्ति ।

17 अधोलिखित वाक्यानां कथानुसारेण क्रम–संयोजनं कुरुत – 1×5=5

(क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ।

(ख) गङ्गातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म ।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान् ।

(घ) वासुदेवः तस्य प्रिय शिष्यः आसीत् ।

(ङ) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

18 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5

शरीरं धर्मस्य प्रथमं साधनम् अस्ति – 'शरीरमाद्यं खलु धर्मसाधनम्' । शरीरस्य आरोग्यं व्यायामेन सिध्यति । यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति । व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति । इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति । जठराग्निः दीप्तः भवति । परिवृद्धम् उदरं सङ्कोचं गच्छति । मस्तिष्कं उर्वरं भवति । अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः ।

(i) धर्मस्य प्रथमं साधनं किम् अस्ति ?

(ii) कीदृशम् उदरं व्यायामेन सङ्कोचं गच्छति ?

(iii) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।

(iv) केन शुद्धरक्तसञ्चारः भवति ?

(v) "कोऽपि" पदस्य सन्धिविच्छेदः कुरुत ।

19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत –

(i) संस्कृतभाषायाः महत्त्वम्

(ii) अस्माकं देश

(iii) सदाचारः

(iv) महाकविः (कालिदासः)